Shivaproktam Chidambarakshetravarnanam

# ஶிவப்ரோக்தம் சித³ம்ப³ரக்ஷேத்ரவர்ணநம்

## Document Information

Text title : Shivaproktam Chidambarakshetravarnanam

File name : shivaproktaMchidambarakShetravarNanam.itx

Category : shiva, shivarahasya, raksha, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 24| 1-29.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# Shivaproktam Chidambarakshetravarnanam

## ஶிவப்ரோக்தம் சித3ம்ப3ரக்ஷேத்ரவர்ணநம்

(ஶிவரஹஸ்யாந்தர்க3தே உக்3ராக்2யே)

- ஶிவபார்தவதீஸம்வாதே3 -

ஶ்ரீஶிவ:

சித3ம்ப3ராபி4த4ம் க்ஷேத்ரம் ஶிவக்ஷேத்ரமநுத்தமம் ।
தத3ப்யேகம் மஹத்ஸ்தா2நம் மம ப்ரியகரம் ஶிவே ॥ 1 ॥

வஸாமி தத்ர ஸததம் ப்3ரஹ்மவிஷ்ண்வாதி3பூஜித: ।
தத்ர மாம் முநய: ஸர்வே ஸேவந்தே ப்ரத்யஹம் ஶிவே ॥ 2 ॥

தஸ்மிந்நேவ ஶிவஸ்தா2நே கோடிஶ: ஸந்தி ஶாங்கரா: ।
தத்ர ரம்யாணி தீர்தா2நி ஸந்தி பாபஹராணி ச ॥ 3 ॥

ருத்3ராக்ஷவநமஸ்த்யேகம் தத்ர பாபப4யாபஹம் ।
தத்ர பி3ல்வவநம் சாஸ்தி ஸர்வதா3 நவபல்லவம் ॥ 4 ॥

நித்யம் ஶிவகதா2லாபா: ஜாயந்தே தத்ர வல்லபே4 ।
ஶிவைகஶரணா ஏவ தத்ர ஸந்தி மம ப்ரியா: ॥ 5 ॥

ஸதா3 மதா3ஸக்தசித்தா: ஸதா3 மத்பூஜநப்ரியா: ।
ஸதா3 மதே3கஶரணா: ஸதா3 மது3பபாத3கா: ॥ 6 ॥

கேசித்3வத3ந்தி மாமீஶம் கௌ3ரீநாதே2தி ஸாத3ரம் ।
கௌ3ரீநாதே2தி நாம்நைவ பூஜயந்தி முஹுர்முஹு: ॥ 7 ॥

கேசித்3வத3ந்தி மாமீஶம் ஶிவேத்யநிஶமாத3ராத் ।
தந்நாம்நைவ நம: பூர்வம் பி3ல்வைரப்4யர்சயந்தி மாம் ॥ 8 ॥

கேசித்3வத3ந்தி மாமீஶம் ஶங்கரேத்யநிஶம் முதா3 ।
தந்நாம்நைவ நம: பூர்வம் பி3ல்வைரப்4யர்சயந்தி மாம் ॥ 9 ॥

கேசித்3வத3ந்தி மாமீஶம் சந்த்3ரசூடே3தி ஸாத3ரம் ।
தந்நாம்நைவ நம: பூர்வம் பி3ல்வைரப்4யர்சயந்தி மாம் ॥ 10 ॥

கேசித்3வத3தி மாமீஶம் விஶ்வநாதே2தி ஸாத3ரம் ।
தந்நாம்நைவ நம: பூர்வம் பி3ல்வைரப்4யர்சயந்தி மாம் ॥ 10 ॥

கேசித்3வத3ந்தி மாமீஶமுமாநாதே2தி ஸாத3ரம் ।
யாவந்த: ஸந்தி விப்ரேந்த்3ரா நித்யம் ஶ்ரீமச்சித3ம்ப3ரே ॥ 12 ॥

ஸர்வே வத3ந்தி தே நித்யம் மஹாதே3வ ஶிவேதி ச ।
மந்நாமசிஹ்நிதா: ஸர்வே ஸந்தி ஶ்ரீமச்சித3ம்ப3ரே ॥ 13 ॥

மந்நாமாம்ரு'தபா: ஸர்வே ஶ்ரீசித3ம்ப3ரவாஸிந: ।
ஶ்ரீமச்சித3ம்ப3ரே தீர்தே2 யாவந்த: ஸந்தி ஸாத4வ: ॥ 14 ॥

தாவந்தோऽப்யர்சயந்த்யேதே மந்நாமாம்ரு'தபாயிந: ।
அமிதா: ஸந்தி ஶைவேந்த்3ரா நித்யம் ஶ்ரீமச்சித3ம்ப3ரே ॥ 15 ॥

சித3ம்ப3ரஸ்த2ஶைவாநாம் ந ஸங்க்2யா வித்3யதே ஶிவே ।
ஶிவக3ங்கா3பி4த4ம் தீர்த2ம் தத்ராஸ்த்யேகம் வராநநே ॥ 16 ॥

தத்ர ஸ்நாத்வா நர: ஸத்3யோ முச்யதே பாபகோடிபி:4 ।
ஆத்3ராயாம் பாதயுக்தாயாம் தத்ர ஸ்நாத்வா யதா2விதி4 ॥ 17 ॥

த3த்வா ஸுவர்ணம் ஶைவாய முச்யதே ப4வப3ந்த4நாத் ।
ஶிவக3ங்கா3தடே ரம்யே நாட்யஸ்த2லமுமேऽஸ்தி மே ॥ 18 ॥

தத்ர நாட்யம் மயா தே3வி க்ரியதே தவ ஸந்நிதௌ4 ।
ஶ்ரீமத3ப்4ரஸபா4நாத2ம் ந்ரு'த்யந்தம் மாம் மஹேஶ்வரம் (நடேஶ்வரம்) ॥ 19 ॥

ப்3ரஹ்மவிஷ்ண்வாத3யோ தே3வா: ஸேவந்தே ப்ரத்யஹம் ஶிவே ।
ந்ரு'த்யந்தம் மாமுமே நித்யம் மஹாதாண்ட3வநாயகம் ॥ 20 ॥

த்3ரு'ஷ்ட்வைவ தூ3ரதோ தே3வாஸ்திஷ்ட2ந்தி ப்4ரு'ஶகஸ்பிதா: ।
ஸ்வர்கா3தி3காந்ஸப்த லோகாந்பூ4ராதீ3நகி2லாநபி ॥ 21 ॥

ஸமாவ்ரு'த்ய மயா தத்ர க்ரு'தம் ந்ரு'த்யம் மநோரமே ।
தத்ர லிங்க3 மமாஸ்த்யேகம் ஶ்ரீமத3ப்4ரஸபா4ஸ்த2லே ॥ 22 ॥

தத்3விலோகநமாத்ரேண ந புநர்ப4வப3ந்த4நம் ।
ஆர்த்3ராயாம் தஸ்ய லிங்க3ஸ்ய த3ர்ஶநம் ய: கரிஷ்யதி ॥ 23 ॥

ஸ மஹாபாபராஶிப்4யோ முச்யதே நாத்ர ஸம்ஶய: ।
யந்மே மூலேஶ்வரம் லிங்க3ம் மூலஸ்தா2நா (நாதா2) பி4த4ம் ஶிவே ॥ 24 ॥

யந்மூலம் ஸர்வஜக3தாமுத்பத்யாதே3ஶ்ச காரணம் ।
மூலஸ்தா2நேஶ்வரம் த்3ரு’ஷ்ட்வா பாதார்த்3ராஸோமவாஸரே ॥ 25 ॥

பி3ல்வபத்ரை: ஸமப்4யர்ச்ய மத்3ரூபம் ப்ராப்நுயாந்நர: ।
மூலேஶ்வரம் ஸமப்4யர்ச்ய ஜப்த்வா பஞ்சாக்ஷரம் தத: ॥ 26 ॥

ருத்3ராத்4யாயம் ச ஜப்த்வாந்தே மம ஸாயுஜ்யமாப்நுயாத் ।
தத்ர த்3வாத3ஶஸாஹஸ்ரம் ஜப்த்வா பஞ்சாக்ஷரம் ஶிவே ॥ 27 ॥

ப்3ரஹ்மஹத்யாதி3பாபேப்4யோ முச்யதே நாத்ர ஸம்ஶய: ।
தத்ர யந்நிஷ்கமாத்ரம் வா ஸுவர்ணம் ஸோத3கம் ஶிவே ॥ 28 ॥

யோ த3த்3யாச்சி2வப4க்தாய ஸ முக்தோ ப4வதி த்4ருவம் । 29.1

॥ இதி ஶிவரஹஸ்யாந்தர்க3தே ஶிவப்ரோக்தம் அருணசலக்ஷேத்ரவர்ணநம் ஸம்பூர்ணம் ॥

- ॥ ஶ்ரீஶிவரஹஸ்யம் । உக்3ராக்2ய: ஸப்தமாம்ஶ: । அத்4யாய: 24 । 1-29.1 ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 24 . 1-29.1..

Notes:

Śiva ஶிவ tells Pārvatī பார்வதீ about the Cidambarakṣetra சித3ம்ப3ரக்ஷேத்ர that has a Rudrākṣa forest ருத்3ராக்ஷவந and a Bilva forest பி3ல்வவந; and is inhabited by several Śāṅkarā-s ஶாங்கரா:. He highlights the merits of bathing in the Śivagaṅgā ஶிவக3ங்கா3 located there, especially during Pātayukta Ārdrā பாதயுக்த ஆர்த்3ரா.

Along the banks of Śivagaṅgā ஶிவக3ங்கா3 is His Nāṭyasthala நாட்யஸ்த2ல where He conducts His Tāṇḍava தாண்ட3வ as SrīmadAbhraSabhānātham ஶ்ரீமத3ப்4ரஸபா4நாத2ம், along with Devi தே3வி. He is worshiped there by Brahmā ப்3ரஹ்மா, Viṣṇu விஷ்ணு et al, and is known there as MahāTāṇḍavaNāyakam மஹாதாண்ட3வநாயகம்.

SrīmadAbhraSabhāsthalam ஶ்ரீமத3ப்4ரஸபா4ஸ்த2லம் has a Śivaliṅga ஶிவலிங்க3, that should be worshiped especially during Ārdrā ஆர்த்3ரா; while the Mūleśvaraliṅga மூலேஶ்வரலிங்க3 / Mūlasthāneśvara மூலஸ்தா2நேஶ்வர should be visited during Pātayukta Ārdrā பாதயுக்த ஆர்த்3ரா especially of Somavāra ஸோமவர.

He mentions about the merits of Rudrādhyāya japa ருத்3ராத்4யாய ஜப and twelve thousand recitations of Pañcākṣara mantra பஞ்சாக்ஷர மந்த்ர.

Proofread by Ruma Dewan

*Shivaproktam Chidambarakshetravarnanam*

pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*